प्रयत्नेन सहृदयं चीयमानतया तदास्वादतया तत्त्वम् ।

**करुणविप्रलम्भ** पु० शृङ्गाररसभेदे । शृङ्गारसत्ता” सा०द० उक्तं यथा

“विप्रलम्भोऽथ सम्भोग इत्येष द्विविधो मतः । तत्र यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ । अभीष्टं नायकं नायिकां वा । स च पूर्वरागमानप्रवासकरुणात्मकश्चतुर्द्धा स्यात्” ।

**करुणानिधि** पु० करुणा निधीयतेऽत्र नि+धा–आधारे कि उप०स० । करुणाधारे दयायुक्ते करुणानिधानादयोऽप्यत्र । [ यस्य । अत्यन्तकरुणायुक्ते ।

**करुणापर** त्रि० करुणायां परः आसक्तः करुणा परा वा

**करुणामय** त्रि० करुणा+प्राचुर्ये मयट् । प्रचुरकरुणावति “काकुत्स्थं करुणामयं गुणनिधिम्, विप्रप्रियं धार्मिकम्” महाना० स्त्रियां ङीप् करुणामयी ।

**करुणिन्** त्रि० मकरुणाऽस्त्यस्य सुखा०इनि । कृपायुक्ते स्त्रियां ङीप् । सिद्धे सुखादिग्रहणम् ठनादिनिवृत्त्यर्थमिति सि०कौ० । तेन सुखादिभ्यो न मतुप् । आर्षे तु क्वचिदिष्यते ।

**करुत्थाम** पु० तुर्वसुवंशे दुष्मन्तपुत्रभेदे । “तुर्वसोश्च सुतो वह्निरित्युपक्रम्य “दुष्मन्तस्य तु दायादः करुत्थामः प्रजेश्वरः ”हरिवं०३२अ० ।

**करन्धम** पु०तुर्वसुवंश्ये त्रैसानोः पुत्रे नृपभेदे । “करन्धमस्तु त्रैसानोर्मरुत्तस्तस्य चात्मजः” हरिवं०३२अ० ।

**करुम** पु०पिशाचभेदे । ये शालाः परिन्तत्यन्ति सायं गर्दभनादिनः । कुसूला ये च कुक्षिलाः ककुभाः करुमाः स्त्रिमाः । तानोषधे ! त्वं गन्धेन विषूचीनान् विनाशय” अथ०८,६,१० ।

**करू** स्त्री कृ–हिंसायाम् ऊ । १कर्त्तने । “चतुर्दश वा आसां करूकराणि”शत०ब्रा०२२,२,४,१० । कर्मणि ऊ । २कृत्ते च ।“वामं देवः करूलती”ऋ०४,३०,२४ । “करूलती कृत्तदन्तः” भा०प्रथो०दन्तस्य लुतादेशः पूष्णोभग्नदन्तत्वेन तथात्वम् ।

**करूष** पु० कृ–ऊषन् । १देशभेदे यस्याधिपतिर्दन्तवक्रः “एष मद्रान् वशे कृत्वा कुरूंश्च सह सोमकैः । चेदिकाशिकरूषांश्च कुशलश्चो वहिष्यति” भा०आ०१२२ अ० । “शिशुपालः सहसुतः करूषाधिपतिस्तथा” भा० स०४अ०। करूषाणां जनपदानां राजा अण् तद्राजत्वात् बहुषु तस्य लुक् । करूषाः तद्राजेषु “दन्तवक्रः करूषश्च करभोमेघवाहनः”भा०स०१३अ० । एकत्वेऽपि लुक् आर्षः । अस्य तालव्यमध्यताऽपि भर्गादिगणे तथापाठात् ततो भर्गा० स्त्रियां न तद्राजप्रत्ययस्य लुक्” सि० कौ० । -

**करूषज** पु० करूषदेशे जायते जन–ड । दन्तवक्रे नृपभेदे “ताविहाथ पुनर्जातौ शिशुपालकरूषजौ” भा० आ०७. १०,३० । तौ जयविजयौ विष्णोःपार्षदौ ।

**करूषाधिपति** पु०६त० । दन्तवक्रे नृपे । “काश्मीरराजो गोनर्दः करूषाधिपतिस्तथा” हरिवं० ६ । करूषाधिपादयोऽप्यत्र ।

**करेऽट** पु०करे अटति अट–अच् अलुक् स० । नखे त्रिका०

**करेऽटव्या** स्त्री करेऽटनं व्ययति व्ये–ड टाप् । धनञ्जूप-क्षिणि त्रिका० । [ ख्याते खगे ! अमरः ।

**करेटु** पु० केन मस्तकेन रेटति रेट–कु । (करकटिया) इति

**करेणु** पु०क–एणु(नु)के मस्तके रेणुरस्य वा । १गजे अमरः । “तस्य समस्तजनहासकरः करेणोः” माघः । उत्क्षिप्तगात्रः स्म विडम्बयन्नभः–करेणुरारोहयते निषादिनम्” माघः “स्वातन्त्र्यमुज्ज्वलमवाप करेणुराजः”माघः १ २कर्णिकारद्रुमे विश्वः । ३गजस्त्रियां स्त्री अमरः ।“ गजाय गण्डूषजलं करेणुः”कुमा० । “करेणुभिर्दन्तकृणालभङ्गाः” रघुः । करेणुदुग्धगुणाश्च सुश्रुते “अश्वायाश्चैव नार्य्याश्च करेणूनाञ्च यत् पयः । तत्त्वनेकौषधिरसप्रसादं प्राणदं गुरु । मधुरं पिच्छिलं शीतं स्निग्धं श्लक्ष्णं मृदु स्तृतम्”सामान्यत उक्ता । “हस्तिन्याः मधुरं वृष्यं कषायानुरसं गुरु । स्निग्धं स्थैर्य्यकरं शीतं चक्षुष्यं बलवर्द्धनम्” उक्ताः । “करेणुः सबङ्कुश्चोरा कन्देन गजरूपिणी । हस्तिकर्णपलाशस्य तुल्यपर्णा द्विपर्णिनी”सुश्रुतोक्तलक्षणायाम् ४ओषधौ स्त्री तदुत्पत्तिकालस्तत्रैवोक्तः । “करेणुस्तत्र कन्या च छत्रातिच्छत्रके तथा । गोलोमो चाजलोमो च महती श्रावणी तथा । वसन्ते कृष्णसर्पाख्यो गोलोमी च प्रतायते” स्वार्थे कन् करेणुकाप्यत्र स्त्री । रायमुकुटस्तु करेणूशब्दं दीर्घान्तं पठित्वा हस्तिनि पुंस्त्रीत्याह ।

**करेणुभू** पु० करेणौ भवति भू–क्विप् । १हस्तिशास्त्रप्रवर्त्तके . पालकाव्यमुनौ हेमच० । २हस्तिजातमात्रे त्रि० ।

**करेणुमती** स्त्री नकुलस्य भार्य्याभेदे । “नकुलस्तु चैद्यां करेणुमतीं भार्य्यामुदावहत्तस्यां पुत्रं निरमित्रं नामाजनयत्” भा० आ० ६५ अ० ।

**करेणुसुत** पु० ६त० । पालकाव्ये मुनौ त्रिका० ।